तेषां ज्ञानी नित्ययुक्त एकभक्तिर्व्विशिष्यते ।
इत्यादिवचनात् प्रेमभक्तोऽयं मुख्य उच्यते ॥
एतत् सर्व्वं भगवता गीताशास्त्रे प्रकाशितम् ।
अतो व्याख्यातुमेतन्मे मन उत्सहते भृशम् ॥
निष्कामकर्म्मानुष्ठानं मूलं मोक्षस्य कीर्त्तितम् ।
शोकादिरासुरः पाशा तस्य च प्रतिबन्धकः ॥
यतः स्वधर्म्मविभ्रंशः प्रतिषिद्धस्य सेवनम् ।
फलाभिसन्धिपूर्व्वा वा साहङ्कारा क्रिया भवेत् ॥
आविष्टः पुरुषो नित्यमेवमासुरपाशभिः ।
पुमर्थलाभायोग्यः सन् लभते दुःखसन्ततिम् ॥
दुःखं स्वभावतो द्वेष्यं सर्व्वेषां प्राणिनामिह ।
अतस्तत्साधनं त्याज्यं शोकमोहादिकं सदा ॥
अनादिभवसन्तानन(रू)ढं दुःखकारणम् ।
दुस्त्यजं शोकमोहादि केनोपायेन हीयताम् ॥
एवमाकाङ्क्षयाविष्टं पुरुषार्थोन्मुखं नरम् ।
बुबोधयिषुरादिदं भगवान् शास्त्रमुत्तमम् ॥”)
एतदन्याः श्रीभागवतोक्तगोपीगीताध्यात्मरामायणोक्तरामगीताश्वमेधिकपर्व्वोक्त ब्राह्मणगीतानुगीते देवीभागवतोक्तभगवतीगीता शिवगीता इत्याद्याः सन्ति ॥

गीतासारः, पुं, (गीतासु सारः गीतानां वेदान्तादिशास्त्राणां वा सारो यत्र इति वा । सुक्षयं संक्षेपेण समस्तयोगज्ञानादिप्रतिपादकशास्त्राणां सारार्थो गीतो यत्र इति तात्पर्य्यार्थः ।) अर्ज्जुनं प्रति श्रीकृष्णोक्तसुक्षयार्थाष्टाङ्गादियोगः । यथा,—

श्रीभगवानुवाच ।
“गीतासारं प्रवक्ष्यामि अर्ज्जुनायोदितं पुरा ।
अष्टाङ्गयोगं सुक्षयं सर्व्ववेदान्तसारगम् ॥
आत्मलाभः परो नान्य आत्मा देहादिवर्ज्जितः ।
रूपादिमान् हि देहोऽतः करणत्वादि लोचनम् ॥
करणत्वान्मनोऽधीनो न प्राणोऽचेतनो यतः ।
विज्ञानरहितः प्राणः सुषुप्ते हि प्रतीयते ॥
नाहमात्मा च दुःखादिसंसाराभिसमन्वयात् ।
विधूम इव दीप्तार्च्चिरादित्य इव दीप्तिमान् ॥
वैद्युतोऽग्निरिवाकाशे हृत्स्थो यः स आत्मनात्मनि ।
श्रोत्रादीनि न पश्यन्ति स्वं स्वमात्मानमात्मना ॥
सर्व्वज्ञः सर्व्वदर्शी च क्षेत्रज्ञस्तानि पश्यति ।
स्वानान्तु मनसा रश्मीन् यदा सम्यङ्नियच्छति ॥
तदा प्रकाशते ह्यात्मा घटे दीपो ज्वलन्निव ।
ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः ॥
यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ।
इन्द्रियाणीन्द्रियार्थांश्च महाभूतानि पञ्च च ॥
मनो बुद्धिमहङ्कारमव्यक्तं पुरुषं तथा ।
प्रसंख्याय परावाप्तौ विमुक्तो बन्धनैर्भवेत् ॥
इन्द्रियग्राममखिलं मनस्यभिनिवेश्य च ।
मनश्चैवाप्यहङ्कारे प्रतिष्ठाप्य च पाण्डव ! ॥
अहङ्कारं तथा बुद्धौ बुद्धिञ्च प्रकृतावपि ।
प्रकृतिं पुरुषे स्थाप्य पुरुषं ब्रह्मणि न्यसेत् ॥
अहं ब्रह्मपरं ज्योतिः प्रसंख्याय विमुच्यते ।
हित्वाद्येभ्यः ख्यातो यः पुरुषः पञ्चविंशकः ॥
विवेकात् केवलीभूतः षड्विंशमनुपश्यति ।
नवद्वारमिदं गेहं त्रिस्थूणं पञ्चसाक्षिकम् ॥
क्षेत्रज्ञाधिष्ठितं विद्वान् यो वेद स परः कविः ॥
ज्ञानयज्ञस्य सर्व्वाणि कलां नार्हन्ति षोड़शीम् ॥”
अश्वमेधसहस्राणि वाजपेयशतानि च ।

इति गारुड़े २३३ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।
“यमाश्च नियमाः पार्थ ! आसनं प्राणसंयमः ।
प्रत्याहारस्तथा ध्यानं धारणार्ज्जुन ! सप्तमी ॥
समाधिरयमष्टाङ्गो योग उक्तो विमुक्तये ।
कर्म्मणा मनसा वाचा सर्व्वभूतेषु सर्व्वदा ॥
अक्लेशजननं प्रोक्तं भूतानां यदहिंसनम् ।
अहिंसा परमो धर्म्मो ह्यहिंसा परमं सुखम् ॥
विधिना या भवेद्धिंसा त्वहिंसा सा प्रकीर्त्तिता ।
यथा नागपदेऽन्यानि पदानि पदगामिनाम् ॥
सर्व्वाण्येवापिधीयन्ते पदजातानि कौञ्जरे ।
एवं सर्व्वं हि हिंसायां धर्म्मार्थमपिधीयते ॥
यद्भूतहितमत्यन्तं वचः सत्यस्य लक्षणम् ।
सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ॥
प्रियञ्च नानृतं ब्रूयात् एष धर्म्मः सनातनः ।
यत्र द्रव्यापहरणं चौर्य्याद्वाथ बलेन वा ॥
स्तेयं तस्यानाचरणमस्तेयं धर्म्मसाधनम् ।
कर्म्मणा मनसा वाचा सर्व्वावस्थासु सर्व्वदा ॥
सर्व्वत्र मैथुनत्यागं ब्रह्मचर्य्यं प्रचक्षते ।
द्रव्याणामप्यनादानमापत्स्वपि यथेच्छया ॥
अपरिग्रहमित्याहुस्तं प्रयत्नेन वर्ज्जयेत् ।
द्विधा शौचं मृज्जलाभ्यां बाह्यं भावादथान्तरम् ॥
यदृच्छालाभतस्तुष्टिः सन्तोषः सुखलक्षणम् ।
मनसश्चेन्द्रियाणाञ्च ऐकाग्र्यं परमं तपः ॥
शरीरशोषणं वापि कृच्छ्रचान्द्रायणादिभिः ।
वेदान्तशतरुद्रीयप्रणवादिजपं बुधाः ॥
सत्त्वशुद्धिकरं पुंसां स्वाध्यायं परिचक्षते ।
स्तुतिस्मरणपूजादिवाङ्मनःकायकर्म्मभिः ॥
सुनिश्चला हरौ भक्तिरेतदीश्वरचिन्तनम् ।
आसनं स्वस्तिकं प्रोक्तं पद्ममर्द्धासनं तथा ॥
प्राणः स्वदेहजो वायुरायामस्तन्निरोधनम् ।
प्राणापाननिरोधस्तु प्राणायाम उपस्थितः ॥
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
नियमः प्रोच्यते सद्भिः प्रत्याहारस्तु पाण्डव ! ॥
मूर्त्तामूर्त्तब्रह्मरूपचिन्तनं ध्यानमुच्यते ।
योगारम्भे मूर्त्तहरिममूर्त्तमथ चिन्तयेत् ॥
नाभिकन्दे स्थितं नालं दशाङ्गुलसमायुतम् ।
नाले चाष्टदलं पद्मं द्वादशाङ्गुलविस्तृतम् ॥
सकर्णिके केशराले सूर्य्यसोमाग्निमण्डलम् ।
अग्निमण्डलमध्यस्थो वासुदेवश्चतुर्भुजः ॥
शङ्खचक्रगदापद्मयुक्तः कौस्तुभसंयुतः ।
वनमाली कौस्तुभेन युतोऽहं ब्रह्ममुक्त ओम् ॥
धारणेत्युच्यते चेयं धार्य्यते यन्मनोलये ।
प्राङ्गभ्यां हृदये चाथ तृतीया च तथोरसि ॥
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ।
किञ्चित्तस्मात् परस्मिंश्च धारणादेशकीर्त्तिताः ॥
अहं ब्रह्मेत्यवस्थानं समाधिरभिधीयते ।
एकाकारः समाधिः स्याद्देशलक्षणवर्ज्जितः ॥”

इति गारुड़े २३४ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।
“ब्रह्मगीतां प्रवक्ष्यामि यां ज्ञात्वा मुच्यते भवान् ।
अहं ब्रह्मास्मीति वाक्याज्ज्ञानान्मोक्षो भवेन्नृणाम् ॥
वाक्यज्ञानं भवेज्ज्ञानादहंब्रह्मपदार्थयोः ।
पदद्वयार्थौ द्विविधौ वाच्यौ लक्ष्यौ स्मृतौ बुधैः ॥
वाच्यौ दशबलौ ज्ञेयौ लक्ष्यौ शुद्धौ प्रकीर्त्तितौ ।
प्राणपिण्डात्मकार्य्येण चेतनं शरणन्तु यत् ॥
तथा वै देवपर्य्यन्तमहं शब्देन नोच्यते ।
प्रत्यग्रूपमद्वितीयमहं शब्देन भण्यते ॥
अद्वयानन्दचैतन्यं परोक्षसहितं परम् ।
प्राणपिण्डात्मकापार्थसद्वितीयविभागकम् ॥
त्यागेन प्रत्यक्चैतन्यभागो लक्ष्येत चाहमा ।
तथा ब्रह्मपदेनैव प्राणपिण्डात्मकारणा ॥
विद्यापरोक्षभागे च परित्यागे च लक्ष्यते ।
अद्वयानन्दचैतन्यभाग एवं विचिन्तयेत् ॥
अहंपदेन चैतन्यप्रत्यग्ब्रह्मपदेन तु ।
अद्वयानन्दचैतन्यं लक्षयित्वा स्थितस्य च ॥
ब्रह्माहमस्म्यहं ब्रह्म अहंब्रह्मपदार्थयोः ।
अहं ब्रह्मास्मि वाक्याच्च आत्मभूतिफलात्मकम् ॥
एकत्वज्ञानञ्च भवेद्देदान्ताद्गुरुतो ध्रुवम् ।
ज्ञानादज्ञानताकार्य्यनिवृत्तिर्भुक्त एकतः ॥”

इति गारुड़े २३५ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।
“सन्मायिब्रह्मतः खं स्यात् खान्मरुत्वांस्ततोऽनलः
अग्नेरापस्ततः पृथ्वी प्रपञ्चीकृतभूतकम् ॥
ततः सप्तदशं लिङ्गं पञ्च कर्म्मेन्द्रियाणि च ।
वाक्पाणिपादं पायुश्च उपस्थमथ धीन्द्रियम् ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं स्यात् पञ्च वायवः ।
प्राणोऽपानः समानश्च व्यानस्तूदान एव च ॥
मनो धीरन्तःकरणं स्यान्मनः संशयात्मकम् ।
बुद्धिर्निश्चयरूपा तु एतत्सूक्ष्मशरीरकम् ॥
हिरण्यगर्भमात्मीयं भूततत्कार्य्यलिङ्गकम् ।
पञ्चीकृतानि भूतानि अपञ्चीकृतभूततः ॥
पञ्चीकृतेभ्यो भूतेभ्यो ब्रह्माण्डं समजायत ।
लोकप्रसिद्धं स्थूलाख्यं शरीरचरणादिमत् ॥
पञ्चीकृतानि भूतानि तत्कार्य्यञ्चाहमेव च ।
सर्व्वं शरीरजातञ्च प्राणिनां स्थूलमीरितम् ॥
तौराडुपरतात्मानः शरीरं प्रोच्यते बुधैः ।
देहद्वयाभिमानी च त्वमर्थो जीव एकतः ॥
सच्छब्दवाच्यं ब्रह्मैव प्रविष्टं देहयोरयोः ।
जलार्कवद्घटखवज्जीवैः प्राणादिधारणात् ॥
जाग्रत्स्वप्नसुषुप्तीनां साक्षी जीवः स च स्मृतः ।
जाग्रत्स्वप्नसुषुप्ताख्यैर्व्यतिरिक्तस्तु निर्गुणः ॥
निर्गतावयवोत्सर्गो नित्यशुद्धस्वभावकः ।
परमात्मैव सञ्जाग्रत्स्वप्नादौ सन्निधानतः ॥
अन्तःकरणरागेश्च अन्तःकरणसंस्थितः ।
जाग्रत्स्वप्नसुषुप्तीश्च पश्यतोऽविकृतः सदा ॥
फलं क्रियाकारकयोर्ज्जाग्रदादीन् वदाम्यहम् ।
इन्द्रियैरनुविज्ञानं जाग्रत्स्थानमुदीरितम् ॥
जाग्रत्संस्कारसम्भूतः प्रत्ययो विषयान्वितः ।
स्वप्नं प्रसुप्तिशरणोपसंहारोऽधिपः स्थितः ॥